त्वमद्य भव नो राजा पुत्रात्मानमभिषेचय । पाहि चास्मान्नरर्षभेत्युक्तो राजकर्तृभिर्धर्मं चिकीर्षुर्भरतः सर्वं जनं प्रत्युवाच । नास्मि स्थापयितव्यो ऽहं सिंहासने । सूर्यवंशे राज्यं सदा शासनीयं ज्येष्ठेन । अतो ऽहं महासेनां योजयित्वा ज्येष्ठभ्रातरं तेजस्विनं सीतापतिं वनादागमयिष्यामीति । एवं भाषमाणे भरते सर्वेषां शृण्वतां विगतशोकानां जनानां नयनेभ्यः प्रहर्षज-बाष्पबिन्दवो निपेतुः । तदनन्तरं बहूञ्छिल्पिनः समाज्ञाप्य राजमार्गं कारयित्वा

यदि त्वार्यं न शक्ष्यामि विनिवर्तयितुं वनात् ।
वने तत्रैव वत्स्यामि यथार्यो लक्ष्मणस्तथेति ॥ १ ॥

वदन्स वनगमनाय प्रतस्थौ । एकदा दण्डकारण्यगते रामे सीतया वनरम-णीयतां दर्शयति सौमित्रिरुपगच्छन्त्या भरतसेनाया रेणुशब्दौ निरूप्य महाशालमारुह्य चमूं दिधक्षन्निव वचनं बभाषे ।

अग्निं संशमयत्वार्यः सीता च भजतां गुहाम् ।
सज्जं कुरुष्व चापं च शरांश्च कवचं तथा ॥ २ ॥

व्यक्तं यत्संप्राप्ताभिषेको भरत आवां घातयितुमिहागतः । एहि भ्रातः । अद्य राज्यमिच्छन्ती कैकेयी मया हतं पुत्रं द्रक्ष्यति गजभग्नं द्रुममिवेति । रामस्तु क्रोधमूर्च्छितं लक्ष्मणं परिसान्त्वयन्वाक्यमब्रवीत् । मास्तु कोपो लक्ष्मण । किमत्र धनुषा कार्यमसिना कवचेन वा । भरतं भ्रातरं हत्वा किं करिष्यामि राज्येन ।

यद्द्रव्यं बान्धवानां वा मित्राणां वा क्षये भवेत् ।
नाहं तत्प्रतिगृह्णीयां भक्षान्विषमयानिव ॥ ३ ॥

भरतं दिदृक्षामि । आवां न्यस्तशस्त्राविह प्रतिपालयावः । तदनन्तरमुपगते सशत्रुघ्ने भरते सर्वेषां दशरथपुत्राणां सानन्दं समागमो ऽभवत् । भरतो रामं वृद्धराजमरणं ज्ञापयामास । ततो ऽयोध्यां पुनरागत्य सर्वलोकं शास्त्वार्य इति बहुवारमुक्तः श्रीरामचन्द्रः पितुः प्रतिज्ञां हृदये स्थापयन् यदुक्तं जीवता मम पित्रा तन्न लोपयितुं शक्यते मयेत्यचिन्तयत् । संपूर्णवनवासानन्तरमयोध्यां मया गमिष्यते लोकशासनं च करिष्यते । यावन्मया वन उष्यते तावद्राज्यं क्रियतां धर्मज्ञेन भरतेनेत्युक्तवान् । अन्ततो भरत एवमुवाच । भवता हेमभूषिते पादुके मह्यं दातव्ये । ते भवत्स्थाने राज्यं करिष्यत इति । तथास्त्विति रामेणानुज्ञातो भरतो भ्रातृपादुके शिरसि स्थापयित्वाभाषत । एते पादुके राज्यं कुरुताम् । अहं नगराद्बहिर्भवत्पादौ दिदृक्षुर्वत्स्यामि । संपूर्णे चतुर्दशे वर्षे यदि त्वां न द्रक्ष्यामि तर्ह्यग्निं प्रवेक्ष्यामीति । ततो ऽयोध्यां च शोकार्तः प्रतिनिववृते ॥